National Journal of Hindi & Sanskrit Research

National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2023; 1(49): 204-207
© 2023 NJHSR
www.sanskritarticle.com

# पाणिनीयव्याकरणे अच्सन्धेः वैविध्यम्

**डॉ. विश्वामित्र राय**

**डॉ. विश्वामित्र राय**
अतिथि प्राध्यापकः, शिक्षाशास्त्रविभागः,
महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः,
उज्जयिनी, मध्यप्रदेशः, भारतम्

**Correspondence:**
**डॉ. विश्वामित्र राय**
अतिथि प्राध्यापकः, शिक्षाशास्त्रविभागः,
महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः,
उज्जयिनी, मध्यप्रदेशः, भारतम्

**प्रबन्धसारः –** पाणिनीयव्याकरणे सन्धिप्रकरणस्य अपरिमितं माहात्म्यं वर्तते। किमपि वाक्यं श्रूयते पठ्यते वा चेत् सर्वादौ तत्र सन्धेः पर्यालोचना करणीया। तेन सन्धिज्ञानं नितराम् अपेक्षते। परन्तु सन्धेः मूलतः प्रकारत्रयमुक्तम् – अच्सन्धिः, हल्सन्धिः, विसर्गसन्धिश्च। तत्र त्रयाणां पुनः अवान्तरविभागा अपि सन्ति। अतः एतेषु अच्सन्धेः प्रकारान् अनुसृत्य अस्मिन् प्रबन्धे ससूत्रमुदाहरणं प्रस्तूयते। पाणिनीयपरम्परानुसारं स्तरानुगुणं विभक्तेषु ग्रन्थेषु एतेषामधिको विस्तारो यद्यपि दृश्यते तथापि प्रारम्भिकविद्यार्थिनां सरलबोधाय सरलेनोपायेन अच्सन्धेः मूलविषयाः प्रस्तूयन्ते। एवंरीत्या विद्यार्थिनां अच्सन्धिप्रकरणस्य सारस्य ज्ञानं तथा मूलग्रन्थदिशा प्रकरणस्य पाठे उत्साहोऽपि वर्धेत।

**कुञ्चीशब्दाः –** सन्धिः, अच्सन्धिः, गुणः, वृद्धिः, पूर्वरूपम्, पररूपम्, एकादेशः।

## भूमिका

वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यादिति **परः सन्निकर्षः संहिता** (1.4.109) इति सूत्रस्य अर्थः व्याकरणे दृश्यते। अस्या एव संहिताया प्रभावः विविधरूपेण पाणिनीयव्याकरणे दृश्यते। तत्रैव अन्यतमो अच्सन्धिः। सन्धिः संहिता इत्यादयो शब्दाः प्रायेण एकार्थका भवन्ति। संहिताविषये परो यः सन्निकर्षः वर्णानाम् अर्धमात्राकालव्यवधानं स संहितासंज्ञो भवतीति काशिकाया[1] मुक्तम्। सम् इत्युपसर्गपूर्वकात् धा-धातोः क्तप्रत्यये टापि च संहिताशब्दो निष्पद्यते। तस्यैव धातोः किप्रत्यये सन्धिशब्दो निष्पन्नो भवति। तेन द्वौ अपि शब्दौ अर्थदृष्ट्या समानौ। पूर्ववैयाकरणैः संहिताशब्दस्य एव प्रयोगः क्रियते स्म, अनन्तरै आचार्यैः भट्टोजिदीक्षितवरदराजाचार्यादिभिः वैयाकरणैः सन्धिशब्दस्य प्रयोगः बाहुल्येन कृतो वर्तते। अयं संधिः प्रकारदृष्ट्या वैयाकरणसिद्धान्तकौमुद्यां पञ्चधा विभक्तः। लघुसिद्धान्तकौमुद्यनुसारं त्रिधा विभक्तं च वर्तते। वस्तुतः सूत्रानुसारं सन्धिषु नैकेषु अवान्तरभेदेषु सत्स्वपि ग्रन्थस्य स्तरानुगुणं एतादृशविभागाः आचार्यैः कृता वर्तन्ते।

वर्णानामतिशयसामीप्ये चत्वारि परिणामानि परिलक्ष्यन्ते। तद्यथा –

- विकारः – द्वयोः वर्णयोः संहितादशायां द्वयोरपि वर्णयोः एकस्य वा वर्णस्य विकृतिर्जायते।
- लोपः – द्वयोः वर्णयोः कस्यापि एकस्य लोपो भवति।
- आगमः – द्वयोः वर्णयोः मध्ये कस्यापि नूतनस्य वर्णस्य आगमो भवति।
- प्रकृतिभावः – द्वावपि वर्णौ स्वस्थितौ स्थगनं प्रकृतिभावः उच्यते।

अस्मिन् प्रबन्धे अच्सन्धेः विविधप्रकाराः तथा तेषामुदाहरणानि पाणिनीयव्याकरणदिशा सोदाहरणं प्रस्तूयन्ते। अच्सन्धेः विविधप्रकारास्तावत् दीर्घसन्धिः, गुणसन्धिः, वृद्धिसन्धिः, यण्सन्धिः, अयादिसन्धिः, पूर्वरूपसन्धिः, पररूपसन्धिः, प्रकृतिभावसन्धिः चेत्यादयः।

## दीर्घसन्धिः

पाणिनीयव्याकरणे दीर्घसन्धिविधानार्थम् **अकः सवर्णे दीर्घः** (6.1.101), **प्रथमयोः पूर्वसवर्णः** (6.1.102), **तस्माच्छसो नः पुंसि** (6.1.103) इत्येवं त्रीणि सूत्राणि यद्यपि उपनिबन्धानि दृश्यन्ते तथापि एतेषु प्रथममेव सूत्रमत्र व्याख्यातुमलम्। अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्[2] इति वैयाकरणसिद्धान्तकौमुद्यां वृत्तावुक्तम्।

दैत्यारिः, श्रीशः, विष्णूदयः, होतॄकारः इत्यादीन्युदाहरणानि तत्र उक्तानि। अक् इति प्रत्याहारे अ, इ, उ, ऋ इत्येते चत्वारो वर्णाः विद्यन्ते। तेषां प्रत्येकेषां सवर्णैः सह योगे दीर्घः आ, ई, ऊ, ॠ इत्येते वर्णा आदेशरूपेण आपतन्ति। अत एव दैत्य + अरि इति स्थिते अकार-अकारयोः स्थाने तस्य दीर्घः आकारः आदिश्यते। तथैव अन्येष्वप्युदाहरणेषु।

एतद्विहाय **प्रथमयोः पूर्वसवर्णः** (6.1.102), **तस्माच्छसो नः पुंसि** (6.1.103) इति द्वे सूत्रे अपि दीर्घविधायके एव। परन्तु एतौ द्वौ सूत्रौ सुब्विषयकौ इति कृत्वा तावत्र उपेक्ष्येते।

**गुणसन्धिः**

**अदेङ् गुणः** (1.1.2) इति सूत्रेण या गुणसंज्ञा विहिता तस्या प्रयोगः विविधरूपेण विविधैश्च सूत्रैः व्याकरणे दृश्यते। परन्तु सन्धिविषये गुणविधायकं एकमेव सूत्रं प्रसिद्धम् – **आद्गुणः** (6.1.87) इति। अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात् इति सूत्रस्यार्थः। सूत्रमिदमुत्सर्गसूत्रमिति कृत्वा वृत्तिगतेन अर्थेन सम्पूर्णोऽर्थः न प्राप्यते। तेन अर्थः इत्थं मन्तव्यः – अवर्णात् अकि परे पूर्वपरयोः गुण एकादेशः स्यादिति। अर्थात् अवर्णादनन्तरम् इ, उ, ऋ, ऌ चेत्येते वर्णा भवन्ति चेत् उच्चारणदृष्ट्या अन्तरतमः गुणादेशः (अ, ए, ओ) भवति। देवेन्द्रः, गङ्गोदकम्, देवर्षिः चेत्यादीनि यथाक्रममुदाहरणानि।

देव+इन्द्र इति स्थिते अकार-इकारयोः स्थाने अन्तरतमः एकारादेशो भवति। अत्र अकार-इकारौ स्थानिनौ एकारश्च आदेशः। स्थानिषु अकारस्य उच्चारणस्थानम् कण्ठः, इकारस्य चोच्चारणस्थानं तालु। तथैव आन्तरतम्यात् कण्ठतालूच्चारणस्थानकस्य एकारस्य आदेशो भवति। तथैव अन्येष्वप्युदाहरणेषु।

गुणादेशविधायकानि एतद्विहायापि अन्यानि सूत्राणि सन्ति। तद्यथा – **मिदेर्गुणः** (7.3.82), **ओर्गुणः** (6.4.146) **सार्वधातुकार्धधातुकयोः** (7.3.84), इत्यादीनि। परन्तु तानि गुणविधायकानि सूत्राणि यद्यपि सन्ति तथापि तानि सन्धिविधायकानि न भवन्तीति कृत्वा अत्र प्रसङ्गे नोल्लिख्यन्ते।

**वृद्धिसन्धिः**

गुणसंज्ञावत् वृद्धिसन्धेरपि क्षेत्रं न केवलं सन्धिपर्यन्तं सीमितं भवति। पाणिनीये सन्धिप्रकरणे वृद्धिसंज्ञाविधायकानि मूलतया त्रीणि सूत्राणि सन्ति। तद्यथा – **वृद्धिरेचि** (6.1.88), एत्येधत्यूठ्सु (6.1.89), **उपसर्गादृति धातौ** (6.1.90) च। एतद्विहाय वृद्धिविधायकानि पाणिनीयानि बहूनि भवन्ति, यथा – **आटश्च** (6.1.90), **अचो ञ्णिति** (7.2.115), **वा सुप्यापिशलेः** (6.1.92) इत्यादीनि। परन्तु तानि यद्यपि वृद्धिविधायकानि सूत्राणि भवन्ति तथापि सन्धिविधायकानि नेति कृत्वा अत्र उपेक्ष्यन्ते।

**वृद्धिरेचि** (6.1.88) सूत्रम् **आद्गुणः** (6.1.87) इति सूत्रस्य अपवादभूतम्। आदेचि परे वृद्धिरेकादेशः स्यादिति[3] सूत्रार्थः। अवर्णात् अनन्तरम् एकारः, ऐकारः, ओकारः, औकारश्च भवन्ति चेत् अनेन सूत्रेण पूर्वपरयोः स्थाने वृद्धिः एकादेशः स्यात्। कृष्णैकत्वम्, गङ्गौघः, देवैश्वर्यम्, कृष्णौत्कण्ठ्यम् इत्यादीनि ग्रन्थगतोदाहरणानि।

तथाहि कृष्ण + एकत्वम् इति स्थिते कृष्णशब्दान्तस्थितात् अकारात् अनन्तरम् एकारस्य विद्यमानतादशायाम् अकार-एकारयोः स्थाने वृद्धौ ऐकारे कृष्णैकत्वम् इति रूपं सिद्ध्यति। एवंरीत्या गङ्गा+औघः, देव+ऐश्वर्यम्, कृष्ण+औत्कण्ठ्यम् इत्यादिषु स्थितेषु वृद्धौ गङ्गौघः, दैवैश्वर्यम्, कृष्णौत्कण्ठ्यम् इत्यादीनि रूपाणि सिद्ध्यन्ति।

अस्य अपरं सूत्रम् **एत्येधत्यूठ्सु** (6.1.89)। अवर्णादेजा**-**द्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्[4] इति सूत्रस्य वृत्तिगतोऽर्थः। संहितायाम् अकारात् आकारात् वा इण्-धातोः एध्-धातोः वा एच्-वर्णे परे **एङि पररूपम्** (6.1.94) इत्यनेन प्राप्तम् पररूपम् बाधित्वा**,** तथा च ऊठ्-शब्दस्य ऊकारे परे **आद्गुणः** (6.1.87) इत्यनेन प्राप्तं गुणैकादेशं बाधित्वा पूर्वपरयोः वृद्ध्येकादेशः भवति — इति सूत्रार्थः। **'वृद्धि'** इति संज्ञया निर्दिष्टः वर्णः आदेशरूपेण अत्र विधीयते इत्यर्थः। उपैति**,** उपैधते**,** प्रष्ठौह इत्यादीनि ग्रन्थगतोदाहरणानि।

उप + एति, उप + एधते इति स्थिते उपसर्गगताकारादनन्तरं विद्यमानौ एकारौ वर्तेते। एतयोरुभयत्र पूर्वपरयोः स्थाने प्रकृतसूत्रेण वृद्ध्यैकादेशे ऐकारे यथाक्रमम् उपैति, उपैधते इति रूपे सिद्ध्यतः। एवं प्रष्ठ+ऊह इति स्थिते अकार-ऊकारयोः स्थाने गुणे प्राप्ते प्रकृतसूत्रेण वृद्ध्यैकादेशे औकारे प्रष्ठौहः इति रूपं सिद्ध्यति।

**उपसर्गादृति धातौ** (6.1.90) इति तृतीयं सूत्रम्। अवर्णान्त-उपसर्गात् ऋकारादौ धातुरूपे परे पूर्वपरयोः **आद्गुणः** (6.1.87) इत्यनेन गुणैकादेशे प्राप्ते तं बाधित्वा प्रकृतसूत्रेण 'आर्' इति वृद्ध्येकादेशः विधीयते इति सूत्रार्थं मनसि निधायैव वृत्तावुक्तम् - अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात् इति। प्रार्च्छति, परार्णाति, अपार्ध्नोति, अवार्णोति, आर्तीयते इत्यादीन्युदाहरणानि। प्र+ऋच्छति इति स्थिते पूर्वपरयोः अकार-ऋकारयोः स्थाने वृद्ध्यैकादेशे, रपरत्वे[5] आर् इत्यादेशे प्रार्च्छति इति रूपं सिद्ध्यति।

एतद्विहायापि अक्षादूहिन्यामुपसङ्ख्यानम्, स्वादीरेरिणोः, प्रादूहो**-**ढोढ्येषैष्येषु, ऋते च तृतीयासमासे, प्रवत्सतरकम्बलवसनार्ण**-**दशानामृणे इति वार्तिकान्यपि वृद्ध्यर्थं विद्यते। स्वैरिणी, प्रौहः, प्रार्णम् इत्यादीनि एतेषामुदाहरणानि।

**यणसन्धिः**

वैयाकरणसिद्धान्तादिग्रन्थेषु सन्धिप्रकरणस्य प्रारम्भ एव यणसन्धिद्वारा दृश्यते। **इको यणचि** (6.1.77) इति सन्धिविधायकं सूत्रम्। इकः स्थाने यण् स्यात् अचि संहितायां विषये इति सूत्रस्यार्थः। स्वरवर्णात् पूर्वम् इवर्णः, उवर्णः, ऋवर्णः, ऌवर्णश्च भवति चेत् एतेषां वर्णानां स्थाने यथाक्रमं यकारः, वकारः, रेफः, लकारश्च भविष्यति। सुध्युपास्यः, मध्वरिः, धात्रंशः, लाकृतिः इत्यादीन्युदाहरणानि। सुधी+उपास्य इति स्थिते उवर्णे अचि परे ईकारस्य स्थाने यण्-सन्धौ यकारे सुध्युपास्यः इति रूपं सिद्ध्यति। एवमेव मधु+अरि,

धातृ+अंशः, लृ+आकृति इत्यादिषु स्थितेषु यथाक्रमं वकारादेशे, रेफादेशे, लकारादेशे च मध्वरिः, धात्रंशः, लाकृतिः इत्यादीनि रूपाणि सिद्ध्यन्ति। एतेषामित्थमादेशे उच्चारणस्थानगतं साम्यं[6] कारणं भवति। पक्षान्तरे यथासंख्यत्वम[7] मपि कारणत्वेन वैयाकरणाः मन्यन्ते।

**अयादिसन्धिः**

अयादिविधायकान्यपि सन्धिसूत्राणि पाणिनीयव्याकरणे महत्तां भजन्ते। पञ्च सूत्राणि यथा - **एचोऽयवायावः** (6.1.78), **वान्तो यि प्रत्यये** (6.1.79), **धातोस्तन्निमित्तस्यैव** (6.1.79), **क्षय्यजय्यौ शक्यार्थे** (6.1.80), **क्रय्यस्तदर्थे** (6.1.81) चायादिविधायकानि। एतेषु अन्तिमे द्वे सूत्रे नितापनार्थके। तत्र प्रथमसूत्रस्यार्थः एकार-ऐकार-ओकार-औकारादनन्तरम् स्वरवर्णा भवन्ति चेत् तेषां तेषां वर्णानां स्थाने यथाक्रमम् अय्, आय्, अव्, आव् चेत्यादेशाः स्युः इति। हरये, विष्णवे, नायकः, पावकः इत्युदाहरणानि। हरे+ए इति स्थिते, विष्णो+ए इति स्थिते, तथा नै+अक इति स्थिते पौ+अक इति स्थिते यथाक्रमम् एकार-ओकार-ऐकार-औकाराणां स्थाने अय्-अव्-आय्-आव् इत्यादेशाः भूत्वा हरये, विष्णवे, नायकः, पावकः इत्येतानि रूपाणि सिद्ध्यन्ति।

**वान्तो यि प्रत्यये** (6.1.79) इति सूत्रमपि **एचोऽयवायावः** (6.1.78) इति सूत्रेण समानार्थकम्। अत्र वैशिष्ट्यं तावत् निमित्तत्वेनात्र यकारादि प्रत्ययो गृहीतः। यकारादौ प्रत्यये परे ओकार-औकारयोः स्थाने अव्-आव् च आदेशाः यथाक्रमं भवन्ति। गव्यम्, नाव्यम् इत्युदाहरणे। गो+य, नौ+य चेति स्थित यकारादौ प्रत्यये परे ओकारस्य स्थाने अवादेशे तथा औकारस्य स्थाने आवादेशे गव्यम् तथा नाव्यम् चेति रूपे सिद्ध्यतः। **धातोस्तन्ननिमित्तस्यैव** (6.1.79) इति सूत्रं **वान्तो यि प्रत्यये** (6.1.79 इति सूत्रेण समानार्थकम्। अत्र **धातोस्तन्निमित्तस्य** (6.1.79) व्याख्या प्रौढग्रन्थादिषु परिलक्षणीया। लव्यम् इत्युदाहरणम्।

**क्षय्यजय्यौ शक्यार्थे** (6.1.80), **क्रय्यस्तदर्थे** (6.1.81) इति सूत्रद्वयं निपातनविधायकम्। क्षय्यम्, जय्यम्, क्रय्यम् इति शब्दाः आभ्यां सूत्राभ्यां निष्पद्यन्ते।

अधुना पररूपसन्धिः पूर्वरूपसन्धिः च यथाक्रमं व्याख्यायते। एवंविधाः सन्धयः अन्यासु लौकिकभाषासु यद्यपि विस्तीर्णरूपेण विन्यस्तरूपेण च न परिलक्ष्यन्ते तथापि अत्र पाणिनीयतन्त्रे महता यत्नेन यथाविधि च पूर्वरूपपररूपविधायकानि सूत्राणि प्रणीतानि। एतानि सूत्राणि **एकः पूर्वपरयोः** (6.1.84) इति सूत्राधिकारे पठितानि भवन्ति। फलतः अत्र सन्धौ स्थानी भवति पूर्ववर्णः परवर्णश्च। पूर्वपरयोः वर्णयोः स्थाने पूर्ववर्णः आदेशरूपेण यत्र भवति स पूर्वरूपसन्धिः इत्युच्यते। परवर्ण आदेशरूपेण यत्र तिष्ठति स पररूपादेशः इति उच्यते।

**पररूपसन्धिः**

पररूपसन्धिविधायकानि पाणिनीये सप्तसूत्राणि सन्ति। तानि यथा – **एङि पररूपम्** (6.1.94), **ओमाङोश्च** (6.1.95), **उस्यपदान्तात्** (6.1.96), **अतो गुणे** (6.1.97), **अव्यक्तानुकरणस्यात इतौ** (6.1.98), **नाम्रेडितस्यान्त्यस्य तु वा** (6.1.99), **नित्यमाम्रेडिते डाचि** (6.1.100) च। एतेषु एङि पररूपम् उसि पदान्तात् इति सूत्रद्वयमालोच्यते। शिष्टानि तु प्रौढविषयत्वात् प्रारम्भिकविद्यार्थिना**-** मनुपयोगीति कृत्वा उपेक्ष्यन्ते।

आदुपसर्गादेङादौ धातौ पररूपमेकादेशः स्यात्। अवर्णान्तात् उपसर्गात् अनन्तरम् एकारादिः, ओकारादिः वा धातुः तिष्ठति चेत् पूर्वपरयोः स्थाने पररूपैकादेशः स्यात्। प्रेजते, उपोषति इत्युदाहरणे। प्र+एजते, उप+ओषति चेति स्थिते अकारस्य एकार-ओकारयोः च स्थाने पररूपैकादेशे प्रेजते, उपोषति च रूपे सिद्ध्यतः।

**ओमाङोश्च** (6.1.95) इति सूत्रस्यार्थः **–** ओमि आङि चात्परे पररूपमेकादेशः स्यात्। अकारात् ओम् आङ् च परं तिष्ठति चेत् पररूपं भवतीति सरलार्थः। शिवायों नमः, शिवेहि इत्युदाहरणे। अत्र उदाहरणयोः शिवाय+ओम् तथा शिव+एहि इति स्थिते पूर्वपरयोः स्थाने पररूपैकादेशे शिवायों तथा शिवेहि इति रूपे सिद्ध्यतः। उदाहरणानां स्पष्टप्रतिपत्त्यर्थम् उदाहरणान्यत्र वाक्यरूपेणैव प्रस्तुतानि वर्तन्ते।

**प्रकृतिभावसन्धिः**

वैयाकरणसिद्धान्तकौमुद्यां सन्धेः पञ्च प्रकारं परिकल्प्य प्रकृतिभावसन्धिः इति भिन्नं प्रकरणमेव तत्र विद्यते। परन्तु लघुसिद्धान्तकौमुद्यां सन्धेः प्रकारत्रयं गृहीत्वा प्रकृतिभाव-विधायकानि सूत्राणि अच्सन्धिप्रकरणान्ते एव सन्निवेशितानि। प्रकृतिभावः यत्र यत्र भवति तत्र सर्वत्र अज्वर्णयोः स्थानित्वेन ग्रहणात् प्रकृतिभावः अच्सन्धिं बाधित्वैव भवतीति हेतोः सुकुमारमतीनां कृते तत्र प्रणयनमपि वरदराजाचार्यस्य दूरदृष्टिमेव समर्थयति। प्रकृतिभावविधायकेषु कतिपयसूत्रेषु मुख्यं सूत्रं तावत् **प्लुतप्रगृह्या अचि नित्यम्** (6.1.125) इति सूत्रम्। अस्मिन् मुख्यसूत्रे प्लुतस्य प्रगृह्यस्य च चर्चा विहिता इति हेतोः अत्र मुख्यालोचनीयत्वेन प्लुतविधायकानि प्रगृह्यविधायकानि च सूत्राणि आलोचनीयानि भवन्ति। एतद्विहायापि **इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च** (6.1.127), **ऋत्यकः** (6.1.128) इति सूत्रे अपि विद्येते। एतद्विहाय सर्वाणि सूत्राणि प्लुतविधायकानि प्रगृह्यविधायकान्येव राजन्ते।

**प्लुतप्रगृह्या अचि नित्यम्** (6.1.125) - प्लुतवर्णेभ्यः प्रगृह्यसंज्ञकशब्देभ्यः अनन्तरम् संहितायाम् स्वरः विद्यते चेद् अपि तत्र सन्धिः न भवति इति सूत्रार्थः। आगच्छ कृष्ण३ अत्र गौश्चरति इति प्लुतस्योदाहरणम्। कृष्ण इति शब्दात् आगच्छ इत्येवंरूपे अचि परे अकः सवर्णे दीर्घः इति सूत्रेण प्राप्तं सवर्णदीर्घं बाधित्वा प्रकृतसूत्रेण प्रकृतिभावे कृष्ण३ अत्र इत्येव तिष्ठति। तथैव हरी एतौ इति प्रगृह्यस्योदाहरणम्। **ईदूदेद्द्विवचनं प्रगृह्यम्** (1.1.11) इति सूत्रेण हरी इत्यस्य प्रगृह्यसंज्ञायां जातायां प्रकृतसूत्रेण प्रकृतिभावे कृते हरी एतौ इति रूपं सिद्ध्येत।

**इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च** (6.1.127) इति सूत्रस्य पदस्य अन्ते विद्यमानस्य इक्-वर्णस्य असवर्णे अच्-वर्णे परे इको यणचि

इत्यनेन यणादेशे प्राप्ते; तद्बाधित्वा शाकल्यस्य मतेन (इत्युक्ते, विकल्पेन) ह्रस्वादेशः, प्रकृतिभावः च भवति इत्यर्थः। चक्रि अत्र, चक्र्यत्र इति उदाहरणम्। पदस्य अन्ते विद्यमानस्य अक्-वर्णस्य असवर्णे ह्रस्व-ऋकारे/ऌकारे परे यणादेशं/सवर्णदीर्घं/गुणम् बाधित्वा शाकल्यस्य मतेन ह्रस्वादेशः, प्रकृतिभावः च भवति इति अर्थो भवति ऋत्यकः इति सूत्रस्य। शाकल्यमतेन अस्य सूत्रस्य प्रवृत्तिर्भवति इत्युक्ते सूत्रमिदं विकल्पेन प्रवर्तते। ब्रह्म ऋषिः, ब्रह्मर्षिः इति उदाहरणम्। एतेषां विस्तृततया व्याख्या ग्रन्थावलोकनेन ज्ञातव्या स्यात्।

**इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च** (6.1.127) - पदान्ता इकोऽसवर्णेऽचि परे प्रकृत्या स्युर्ह्रस्वश्च वा इति सूत्रस्यार्थः। इयं प्रक्रिया शाकल्यस्य मतेन भवति इत्युक्ते पाणिनिमते विकल्पेन भवतीति स्थितम्। तेन चक्रि+अत्र इति स्थिते चक्र्यत्र, चक्रि अत्र इत्युदाहरणं संगच्छते।

**ऋत्यकः** (6.1.128) - पदान्त-अक्-वर्णस्य ह्रस्व-ऋकारे/ऌकारे परे संहितायाम् शाकल्यस्य मतेन ह्रस्वादेशः भवति, तदनन्तरं च सन्धिकार्यं न भवति इति सूत्रस्यार्थः। ब्रह्म ऋषिः, ब्रह्मर्षिः इत्युदाहरणम्।

एतदनन्तरं अत्र मूलतः प्रगृह्यविधायकानि प्लुतविधायकानि च सूत्राणि पठनीयानि भवन्ति। तेन प्रकृतिभावप्रकरणस्य विषयः सम्यगवगतः स्यात्।

**प्रबन्धस्योपयोगिता**

विद्यार्थिनां कृते अयं प्रबन्धः महते उपकाराय स्यात्। यतः सन्धिप्रकरणं व्याकरणशास्त्रे किञ्चन प्रारम्भिकं प्रकरणं भवति। त्रिविधेषु सन्धिप्रकारेषु प्राथम्यम् अच्सन्धेरेव वर्तते। अथ अस्मिन् प्रकरणे के के अवान्तरसन्धयः सन्ति इत्यादयो विषयाः तेषामुदाहरणानि च बालानां सुखबोधाय अस्मिन् प्रबन्धे सरलार्थेन सह प्रस्तुतानि सन्ति। परन्तु अत्र विहङ्गमदृष्ट्या एव आलोचनं विहितमिति कृत्वा प्रकरणपाठादनन्तरं प्रकरणपाठात्पूर्वं वा सहायकत्वेन प्रबन्धोऽयमुपकारी स्यात्। अन्यथा अच्सन्धेः ज्ञानाय विद्यार्थिभिः वैयाकरणसिद्धान्तकौमुद्याः लघुसिद्धान्तकौमुद्याः वा पठनीयमिति अवधार्यम्।

**सहायकग्रन्थसूची**


वैयाकरणसिद्धान्तकौमुदी, भट्टोजीदीक्षितः, सम्पा. गिरिधरशर्मा चतुर्वेदः, परमेश्वरानन्दशर्मा विद्याभास्करः, 1996.

लघुसिद्धान्तकौमुदी, वरदराजाचार्यः, गीताप्रेस, गोरखपुर, 1998.

भैमीव्याख्या, वरदराजाचार्यः, व्याख्याकारः – भीमसेन शास्त्री, भैमी प्रकाशन, दिल्ली, 1993.

सन्धिः, जि. महाबालेश्वरभट्टः, संस्कृतभारती, बेङ्गलुरू, 2003.


**संदर्भाः**

1. काशिका – 1.4.109
2. वैयाकरणसिद्धान्तकौमुदी
3. वैयाकरणसिद्धान्तकौमुदी
4. तत्रैव
5. उरण् रपरः इति शास्त्रानुसारम्
6. साम्यत्वं च स्थानेऽन्तरतमः इति सूत्रेण
7. यथासंख्यमनुदेशः समानाम् इति सूत्रमत्र मानम्